# सुन्दरकाण्ड पञ्चषष्टितमः सर्गः (६५) - ॥ चूडामणि प्रदानम् ॥

ततः प्रस्रवणं शैलं ते गत्वा चित्र काननम् ।
प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम् ॥ १ ॥

युवराजं पुरस्कृत्य सुग्रीव मभिवाद्य च ।
प्रवृत्तिमथ सीतायाः प्रवक्तु मुपचक्रमुः ॥ २ ॥

रावणान्तःपुरे रोधं राक्षसीभिश्च तर्जनम् ।
रामे समनुरागं च यश्चायं समयः कृतः ॥ ३ ॥

एतदाख्यान्ति ते सर्वे हरयो राम सन्निधौ ।
वैदेही मक्षतां श्रुत्वा रामस्तूत्तर मब्रवीत् ॥ ४ ॥

क्व सीता वर्तते देवी कथं च मयि वर्तते ।
एतन् मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥ ५ ॥

रामस्य गदितं श्रुत्वा हरयो राम सन्निधौ ।
चोदयन्ति हनूमन्तं सीता वृत्तान्त कोविदम् ॥ ६ ॥

श्रुत्वा तु वचनं तेषां हनुमान् मारुतात्मजः ।
प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति ॥ ७ ॥

उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा ।
समुद्रं लङ्घयित्वाऽहं शत योजन मायतम् ॥ ८ ॥

अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ।
तत्र लङ्केति नगरी रावणस्य दुरात्मनः ॥ ९ ॥

दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे ।
तत्र दृष्टा मया सीता रावणान्तःपुरे सती ॥ १० ॥

संन्यस्य त्वयि जीवन्ती रामा राम मनोरथम् ।
दृष्टा मे राक्षसी मध्ये तर्ज्यमाना मुहुर्मुहुः ॥ ११ ॥

राक्षसीभिर् विरूपाभी रक्षिता प्रमदावने ।
दुःख मापद्यते देवी तता दुःखोचिता सती ॥ १२ ॥

रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता ।
एकवेणी धरा दीना त्वयि चिन्ता परायणा ॥ १३ ॥

अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ।
रावणाद् विनिवृत्तार्था मर्तव्य कृत निश्चया ॥ १४ ॥

देवी कथञ्चित् काकुत्स्थ त्वन्मना मार्गिता मया ।
इक्ष्वाकु वंश विख्यातिं शनैः कीर्तयता नघ ॥ १५ ॥

सा मया नर शार्दूल विश्वास मुपपादिता ।
ततः सम्भाषिता देवी सर्वमर्थं च दर्शिता ॥ १६ ॥

राम सुग्रीव सख्यं च श्रुत्वा प्रीति मुपागता ।
नियतः समुदाचारो भक्तिश् चास्यास् तथा त्वयि ॥ १७ ॥

एवं मया महाभागा दृष्टा जनक नन्दिनी ।
उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ ॥ १८ ॥

अभिज्ञानं च मे दत्तं यथा वृत्तं तवान्तिके ।
चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥ १९ ॥

विज्ञाप्यश्च नर व्याघ्रो रामो वायुसुत त्वया ।
अखिलेनेह यद् दृष्ट मिति मामाह जानकी ॥ २० ॥

अयं चास्मै प्रदातव्यो यत्नात् सुपरिरक्षितः ।
ब्रुवता वचनान् येवं सुग्रीवस्योप शृण्वतः ॥ २१ ॥

एष चूडामणिः श्रीमान् मया सुपरिरक्षितः ।
मनःशिलायास् तिलको गण्ड पार्श्वे निवेशितः ॥ २२ ॥

एष निर्यातितः श्रीमान्मया ते वारिसम्भवः ॥ २३ ॥

एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ ।
जीवितं धारयिष्यामि मासं दशरथात्मज ॥ २४ ॥

ऊर्ध्वं मासान् न जीवेयं रक्षसां वशमागता ।
इति मा मब्रवीत् सीता कृशाङ्गी धर्मचारिणी ॥ २५ ॥

रावणान्तःपुरे रुद्धा मृगी वोत्फुल्ल लोचना ।
एतदेव मयाख्यातं सर्वं राघव यद्यथा ।
सर्वथा सागर जले सन्तारः प्रविधीयताम् ॥ २६ ॥

तौ जाताश्वासौ राज पुत्रौ विदित्वा
तच्चाभिज्ञानं राघवाय प्रदाय ।
देव्या चाख्यातं सर्वमेवानु पूर्व्यात्
वाचा सम्पूर्णं वायुपुत्रः शशंस ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥